१२

प्रत्ययस्वराः

प्रस्तावना-

अस्मिन् प्रत्ययस्वराख्ये प्रकरणे प्रत्ययानां स्वरविषये संक्षेपेण किञ्चित् विवरणं कृतम्। वेदे उदात्तस्वरः, अनुदात्तस्वरः, स्वरितस्वरश्च इति सामान्यतः त्रयः स्वराः विद्यन्ते। उदात्त-अनुदात्त-स्वरितसंज्ञाः अष्टाध्याय्यां विहिताः। तत्र उदात्तसंज्ञाविधायकं पाणिनीयसूत्रं हि उच्चैरुदात्तः इति। अनुदात्तसंज्ञाविधायकं सूत्रं नीचैरनुदात्तः इति। स्वरितसंज्ञाविधायकं सूत्रं हि समाहारः स्वरितः इति। तत्र अनुदात्तस्वरस्य बोधनार्थं ◌॒ इति सङ्केतः स्वीक्रियते। स्वरितस्वरस्य बोधनार्थं ◌॑ इति सङ्केतः स्वीक्रियते। किन्तु उदात्तस्वरस्य बोधनार्थम् एतादृशः कश्चन विशेषः प्रयत्नः न क्रियते। प्रकृतपाठे अस्मिन् उदात्तस्वरस्य अनुदात्तस्वरस्य च आलोचनं क्रियते।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- प्रत्ययानां स्वरविधानविषये ज्ञातुं शक्नुयात्।
- अग्निशब्दस्य नकारोत्तरस्य इकारस्य कः स्वरः इति विषये ज्ञातुं शक्नुयात्।
- पित्प्रत्ययानां कः स्वरः भवति इति ज्ञातुं शक्नुयात्।
- तद्धितप्रत्ययानां कः स्वरः भवति इति ज्ञातुं शक्नुयात्।
- सूत्राणाम् अर्थनिर्णयं कर्तुं समर्थो भवेत्।
- सूत्राणां व्याख्यानं कर्तुं स्वयमपि योग्यो भवेत्।
- अनुवृत्त्यादीनां ज्ञानं भवितुं शक्नुयात्।

१२.१) आद्युदात्तश्च (३.१.३)

सूत्रार्थः - प्रत्ययः आद्युदात्त एव स्यात्।

सूत्रावतरणम्- प्रत्ययस्य आद्युदात्तत्वविधानार्थमिदं सूत्रं प्रणीतम्।

सूत्रव्याख्या- संज्ञा- परिभाषा- विधि- नियमातिदेशाधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदम् अधिकारसूत्रम्। अत्र पदद्वयं विराजते। आद्युदात्तः च इति सूत्रगतपदच्छेदः। आद्युदात्तः इति प्रथमान्तं पदम्, च इति अव्ययपदम्। प्रत्ययः इति प्रथमैकवचनान्तं पदम् अत्र अधिक्रियते। ततश्च सूत्रार्थो भवति - प्रत्ययः आद्युदात्तः एव भवति इति।

उदाहरणम्-अ॒ग्निः। क॒र्तव्यम् इति।

सूत्रार्थसमन्वयः- गत्यर्थकस्य अगिधातोः इकारः उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञकः, अतः एष धातुः इदित्। अत एव धातोरस्य इदित्त्वात् अङ्गेर्नलोपश्च इति सूत्रेण अगिधातोः परं प्रकृतसूत्रेण निप्रत्यये अग् नि इति स्थिते सर्वसंयोगे अग्नि इति स्थिते शब्दस्वरूपस्य कृदन्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन तस्य प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ्सोसांङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सुप्रत्यये अनुनासिकत्वेन पाणिनीयैः प्रतिज्ञातस्य उकारस्य उपदेशेऽजनुनासिकः इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण इत्संज्ञकस्य उकारस्य लोपे अग्नि स् इति स्थिते संयोगे निष्पन्नस्य अग्निस् इति शब्दस्वरूपस्य सुबन्तत्वात् तदन्तस्य सकारस्य स्थाने ससजुषोः रुः इति आदेशे रोः उकारस्य उपदेशेऽजनुनासिक इत् इति इत्संज्ञायां लोपे च कृते अग्नि र् इति स्थिते रेफोच्चारणात् परस्य वर्णाभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायां तत्परकत्वात् पूर्वस्य रेफस्य स्थाने खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गे अग्निः इति सुबन्तं रूपं सिद्ध्यति। अग्निशब्दः निप्रत्ययान्तः। अत एव प्रकृतसूत्रेण निप्रत्ययस्य इकारस्य उदात्तत्वं विधीयते।

विशेषः- आद्युदात्तः स एव भवति यः प्रत्ययसंज्ञः भवति, तन्नाम यः यः शब्दः प्रत्ययाधिकारे पठितः, तस्य तस्य शब्दस्य आदिः स्वरः उदात्तः भवति।

१२.२) अनुदात्तौ सुप्पितौ(३-१-४)

सूत्रार्थः- सुप्पितौ प्रत्ययौ अनुदात्तौ भवतः।

सूत्रावतरणम्- सुप्प्रत्ययानां पित्प्रत्ययानां च स्वराणाम् अनुदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- संज्ञा- परिभाषा- विधि- नियमातिदेशाधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सुप्प्रत्ययानां पित्प्रत्ययानां च स्वराणाम् अनुदात्तत्वं विधीयते। अस्मिन् सूत्रे द्वे पदे विद्येते। अनुदात्तौ, सुप्पितौ इति पदगतच्छेदः ज्ञायते। यमुद्दिश्य यत् किञ्चित् कार्यं विधीयते तत् कार्यम् उद्देश्यम् इति कथ्यते, अतः सुप्पितौ इति प्रथमाद्विवचनान्तम् उद्देश्यबोधकं पदम्। यत् विधीयते तत् विधेयम् इत्युच्यते, अतः अनुदात्तौ इति च विधेयबोधकं प्रथमाद्विवचनान्तं पदम्। अत्र सुप्प्रत्ययमुद्दिश्य पित्प्रत्ययञ्च उद्दिश्य अनुदात्तत्वविधिः भवति। अत्र सूत्रस्यास्य पदान्वयः च इत्थम्- सुप्पितौ अनुदात्तौ इति। ततश्च अयं सूत्रार्थः अत्र लभ्यते- सुप्प्रत्ययः पित्प्रत्ययः च अनुदात्तौ भवतः इति।

उदाहरणम्- य॒ज्ञस्य॑। न यो युच्छति।

सूत्रार्थसमन्वयः- रूढिपक्षे यज्ञशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यनेन सूत्रेण तस्य प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ्सोसांङ्योस्सुप् इति सूत्रेण एकविंशतिस्वादिप्रत्ययेषु प्राप्तेषु षष्ठ्येकवचनविवक्षायां ङस्प्रत्यये यज्ञ ङस् इति स्थिते ङसः ङकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम् तस्य लोपः इति सूत्रेण च इत्संज्ञकस्य ङकारस्य लोपे कृते यज्ञ अस् इति स्थिते अदन्तात् प्रातिपदिकात् परस्य असः स्थाने टाङसिङसामिनात्स्याः इति सूत्रेण स्य

इत्यादेशे यज्ञ स्य इति स्थिते सर्वसंयोगे यज्ञस्य इति रूपं सिद्ध्यति। यज्ञस्य इत्यत्र यः ङसः स्थाने विहितः स्यादेशः, तस्मिन् स्थानिवद्भावेन सुप्त्वधर्मस्यारोपः क्रियते। तेन स्यप्रत्यये सत्यपि सुप्त्वं सिद्ध्यति। ततश्च प्रकृतसूत्रेण स्यप्रत्ययस्य यकारोत्तरस्य अकारस्य अनुदात्तत्वं सिद्ध्यति।

इदानीं द्वितीयोदाहरणस्य विषये आलोचना विधीयते। द्वितीयमुदाहरणमस्ति पित्प्रत्ययस्य विषये। अस्योदाहरणं हि युच्छति इति अत्र युच्छ प्रमादे इति धातोः वर्तमाने लट् इति लटि लटः अकारटकारयोः इत्संज्ञायां लोपे च कृते युच्छ् ल् इति स्थिते लकारस्य स्थाने तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथान्ध्वमिड्वहिमहिङ् इति सूत्रेण अष्टादशसु तिप्प्रत्ययेषु प्राप्तेषु प्रथमपुरुषैकवचनविवक्षायां तिप्प्रत्यये युच्छ् तिप् इति स्थिते पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम् इत्संज्ञकस्य पकारस्य तस्य लोपः इति सूत्रेण लोपे कर्तरि शप् इति सूत्रेण धातोः शप्प्रत्यये शप्प्रत्ययस्य आदेः शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायां पकारस्य च हलन्त्यम् इति सूत्रेण इत्संज्ञायां ततश्च उभयोः इत्संज्ञकयोः लकारपकारयोः तस्य लोपः इति लोपे कृते युच्छ् अ ति इति स्थिते सर्वसंयोगे युच्छति इति रूपं सिद्ध्यति। तिप्प्रत्ययस्य पित्त्वात् प्रकृतसूत्रेण समुदायस्य अन्तस्य स्वरस्य उदात्तत्वं सिध्यति। अर्थात् युच्छति इत्यत्र अन्तिमस्य अचः इकारस्य उदात्तत्वं सिद्ध्यति।

विशेषः- एतत् सूत्रं पूर्वस्य आद्युदात्तश्च इति सूत्रस्य अपवादभूतम् अस्ति। तेन च एतत् सूत्रं यत्र प्रवर्तते तत्र आद्युदात्तश्च इति सामान्यसूत्रं न प्रवर्तते।

१२.३) चितः- (६.१.१६३)

सूत्रार्थः- चितः अन्तः उदात्तः स्यात्।

सूत्रावतरणम्- चित्प्रत्ययानाम् अन्तस्य स्वरस्य उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- संज्ञा- परिभाषा- विधि- नियमातिदेशाधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन चित्प्रत्ययान्तस्य प्रकृतिप्रत्ययसमुदास्य अन्त्यस्य स्वरस्य उदात्तत्वं विधीयते। चितः इत्यत्र षष्ठ्यर्थे प्रथमैकवचनम्। कर्षात्वतो घञः अन्त उदात्तः इति सूत्रात् अन्तः इति उदात्तः चेति प्रथमैकवचनान्तं पदद्वयम् अत्र अनुवर्तते। इदानीम् अत्र चितः सप्रकृतेर्बह्वकजर्थम् इति वार्तिकेन चित्प्रत्ययवतः समुदायस्य इत्यर्थः लभ्यते। तथाहि चकारः इत् यस्य स चित् इति बहुव्रीहिसमासः। ततः चित् अस्य अस्ति इति चित्-प्रातिपदिकात् मत्वर्थीये अच्प्रत्यये चितः इति रूपम्। अतः पदान्वयः इत्थं सम्भवति- चितः अन्तः उदात्तः इति। ततश्चायम् अत्र सूत्रार्थः- चित्प्रत्ययवतः प्रकृतिप्रत्ययसमुदायस्य अन्तः स्वरः उदात्तः स्यात् इति।

उदाहरणम्- नभन्तामन्युके समे।

सूत्रार्थसमन्वयः- नभन्तामन्युके समे इत्यत्र अन्यके इत्यत्र अकच्प्रत्ययः विहितः। स च अकच्प्रत्ययः चित् अस्ति। अतः अकज्रूपचित्प्रत्ययान्तत्वात् अन्यके इति प्रकृतिप्रत्ययवतः समुदायस्य अन्तः स्वरः एकारः प्रकृतसूत्रेण उदात्तो भवति।

१२.४) तद्धितस्य (६.१.१६४)

सूत्रार्थः- चितः तद्धितस्य अन्तः उदात्तः स्यात्।

सूत्रावतरणम्- तद्धितचित्प्रत्ययान्तस्य प्रकृतिप्रत्ययसमुदायस्य अन्तिमस्वरस्य उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- संज्ञा- परिभाषा- विधि- नियमातिदेशाधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन तद्धितचित्प्रत्ययान्तस्य प्रकृतिप्रत्ययसमुदायस्य अन्तिमस्वरस्य उदात्तत्वं विधीयते। अस्मिन् सूत्रे एकमेव तद्धितस्य इति पदं वर्तते। तच्च तद्धितस्य इति षष्ठ्येकवचनान्तं पदम्। कर्षात्वतो घञः अन्त उदात्तः इति सूत्रात् अन्तः इति उदात्तः चेति प्रथमैकवचनान्तं पदद्वयम् अत्र अनुवर्तते। चितः इति पूर्वसूत्रात् चितः इति षष्ठ्यर्थे प्रथमैकवचनान्तं पदमत्र अनुवर्तते। अत्र चितः इति पदस्य अनुवर्तनात् चित्प्रत्ययवतः प्रकृतिप्रत्ययसमुदायस्य इत्यर्थो लभ्यते। ततश्च अत्र पदान्वयः इत्थं भवति- चितः तद्धितस्य प्रकृतिप्रत्ययसमुदायस्य अन्तः उदात्तः इति। तेन अत्रायं सूत्रार्थः भवति - तद्धितचित्प्रत्ययान्तस्य प्रकृतिप्रत्ययसमुदायस्य अन्तिमस्वरस्य उदात्तत्वं स्यात् इति।

उदाहरणम्- कौञ्जायनाः।

सूत्रार्थसमन्वयः- कौञ्जायनाः इत्यत्र च्फञ् इति तद्धितप्रत्ययः विहितः। तथाहि कुञ्जशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञायां ततः च्फञ् इति तद्धितप्रत्यये कुञ्ज च्फञ् इति स्थिते च्फञ्-प्रत्ययाद्यस्य चकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, ञकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण तयोः इत्संज्ञकयोः चकारञकारयोः लोपे कुञ्ज फ इति स्थिते फकारस्य स्थाने आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रेण आयन् इत्यादेशे कुञ्ज आयन् अ इति स्थिते च्फञ्-प्रत्ययस्य ञित्त्वात् तद्धितेष्वचामादेः इति सूत्रेण कुञ्जशब्दस्य आदेः उकारस्य वृद्धौ औकारे भसंज्ञकस्य कौञ्जायनशब्दस्य अन्त्यस्य अकारस्य च यस्येति च इति सूत्रेण लोपे सर्वसंयोगे निष्पन्नस्य कौञ्जायन इति शब्दस्वरूपस्य तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण तस्य प्रातिपदिकसंज्ञायां ततः ङ्याप्प्रातिपदिकात्, प्रत्ययः परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु प्रथमाबहुवचनविवक्षायां जस्प्रत्यये जस्प्रत्ययादेः जकारस्य चुटू इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण च तस्य इत्संज्ञकस्य जकारस्य लोपे कौञ्जायन अस् इति स्थिते संयोगे निष्पन्नस्य कौञ्जायनास् इति शब्दस्वरूपस्य सुबन्तत्वात् तदन्तस्य सकारस्य स्थाने ससजुषोः रुः इति आदेशे रोः उकारस्य उपदेशेऽजनुनासिक इत् इति इत्संज्ञायां लोपे च कृते कौञ्जायनार् इति स्थिते रेफोच्चारणात् परस्य वर्णाभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायां तत्परकत्वात् पूर्वस्य रेफस्य स्थाने खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गे कौञ्जायनाः इति सुबन्तं रूपं सिद्ध्यति। अत्र च्फञ् इति चित् तद्धितप्रत्ययश्च वर्तते। अतः तद्धितान्तस्य कौञ्जायन इति शब्दस्य अन्त्यस्य स्वरस्य अकारस्य उदात्तत्वं विधीयते।

१२.५) कितः (६.१.१६६)

सूत्रार्थः- कितस्तद्धितस्यान्त उदात्तः।

सूत्रावतरणरम्- तद्धितकित्प्रत्ययान्तस्य शब्दस्य अन्तस्य स्वरस्य उदात्तविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- संज्ञा-परिभाषा-विधि-नियमातिदेशाधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण तद्धितकित्प्रत्ययान्तस्य शब्दस्य अन्त्यस्य स्वरस्य उदात्तत्वं विधीयते। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् अन्तः इति उदात्तः चेति प्रथमैकवचनान्तं पदद्वयम् अत्र अनुवर्तते। पूर्वसूत्रात् तद्धितस्य इति षष्ठ्येकवचनान्तं पदम् अनुवर्तते। ततश्च अत्र पदान्वयः इत्थं भवति- कितः तद्धितस्य अन्तः उदात्तः इति। तद्धितस्य इति पदस्य विशेष्यरूपेण प्रत्ययस्य इति पदमत्र अनुवर्तते। तेन अत्र सूत्रार्थः इत्थं भवति- तद्धितकित्प्रत्ययान्तस्य शब्दस्य अन्तः उदात्तो भवति इति।

उदाहरणम्- यदाग्नेयः।

सूत्रार्थसमन्वयः- अस्मिन् उदाहरणे आग्नेयः इति पदे ढक् इति तद्धितप्रत्ययः विद्यते। तथाहि अग्निशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञायां ततः ढक्- इति तद्धितप्रत्यये अग्नि ढक् इति स्थिते ढक्- प्रत्ययान्तस्य ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण इत्संज्ञकस्य ककारस्य लोपे अग्नि ढ इति स्थिते ढकारस्य स्थाने आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रेण एय् इत्यादेशे अग्नि एय् अ इति स्थिते ढक्प्रत्ययस्य कित्त्वात् किति च इति सूत्रेण अग्निशब्दस्य आदेः अकारस्य वृद्धौ आकारे भसंज्ञकस्य आग्नि इति शब्दस्य अन्त्यस्य इकारस्य यस्येति च इति सूत्रेण लोपे वर्णसंयोगे निष्पन्नस्य आग्नेय इति शब्दस्वरूपस्य तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण तस्य प्रातिपदिकसंज्ञायां ततः ङ्याप्प्रातिपदिकात्, प्रत्ययः परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सुप्रत्यये अनुनासिकत्वेन पाणिनीयैः प्रतिज्ञातस्य उकारस्य उपदेशेऽजनुनासिकः इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण इत्संज्ञकस्य उकारस्य लोपे आग्नेय स् इति स्थिते संयोगे निष्पन्नस्य आग्नेयस् इति शब्दस्वरूपस्य सुबन्तत्वात् तदन्तस्य सकारस्य स्थाने ससजुषोः रुः इति आदेशे रोः उकारस्य उपदेशेऽजनुनासिक इत् इति इत्संज्ञायां लोपे च कृते आग्नेयर् इति स्थिते रेफोच्चारणात् परस्य वर्णाभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायां तत्परकत्वात् पूर्वस्य रेफस्य स्थाने खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गे आग्नेयः इति सुबन्तं रूपं सिद्ध्यति।

१२.६) तिसृभ्यो जसः (६.१.१६६)

सूत्रार्थः- त्रिसृशब्दात् परस्य जसः अन्तः उदात्तः स्यात्।

सूत्रावतरणम्- तिसृशब्दात् परस्य जसः अन्त्यस्वरस्य उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। अत्र पदद्वयं वर्तते। तिसृभ्यः इति पञ्चमीबहुवचनान्तं पदम्, जसः इति षष्ठ्येकवचनान्तं पदम्। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् अन्तः, उदात्तः चेति प्रथमैकवचनान्तं पदद्वयम् अत्र अनुवर्तते। तिसृभ्य इत्यत्र पञ्चमीविधानात् तस्मादित्युत्तरस्य इति परिभाषया अत्र परस्य इति पदमत्र उपतिष्ठते। ततश्च अत्र पदान्वयः भवति- तिसृभ्यः परस्य जसः अन्तः उदात्तः स्यात् इति। तिसृशब्दः नित्यं बहुवचनान्तः। एवञ्च अत्र सूत्रार्थो भवति- तिसृशब्दात् परस्य जसः अन्तः स्वरः उदात्तः स्यात् इति।

उदाहरणम्- ति॒स्रो द्याव॑ः स॒वि॒तुः।

सूत्रार्थसमन्वयः- तिसृशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञायां ततः ङ्याप्प्रातिपदिकात्, प्रत्ययः परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु प्रथमाबहुवचनविवक्षायां जस्प्रत्यये जस्प्रत्ययादेः जकारस्य चुटू इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण च तस्य इत्संज्ञकस्य जकारस्य लोपे तिसृ अस् इति स्थिते अचि र ऋतः इति सूत्रेण अच्परकत्वात् तिसृशब्दस्य ऋकारस्य स्थाने रेफादेशे तिस्रस् इति स्थिते तस्य शब्दस्य सुबन्तत्वात् तदन्तस्य सकारस्य स्थाने ससजुषोः रुः इति आदेशे रोः उकारस्य उपदेशेऽजनुनासिक इत् इति इत्संज्ञायां लोपे च कृते तिस्रर् इति स्थिते रेफोच्चारणात् परस्य वर्णाभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायां तत्परकत्वात् पूर्वस्य रेफस्य स्थाने खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गे तिस्रः इति सुबन्तं रूपं सिद्ध्यति। अत एव तिसृभ्यः इत्यत्र प्रकृतसूत्रेण अन्तिमस्य अकारस्य उदात्तत्वं विधीयते

पाठगतप्रश्नाः-१

१. अग्निशब्दात् निप्रत्ययस्य विधानं केन भवति?
२. आद्युदात्तश्च इति सूत्रेण किं विधीयते?
३. अग्निशब्दे नकारात् परः इकारः उदात्तः अनुदात्तो वा?
४. अग्निः इत्यत्र कः धातुः?
५. सुप्प्रत्ययस्य पित्प्रत्ययस्य च अनुदात्तत्वं केन विधीयते?
६. चितः अन्तः उदात्तः केन सूत्रेण भवति?
७. तद्धितस्य इति कीदृशं सूत्रम्?
८. कितस्तद्धितस्यान्त उदात्तः केन विहितः?
९. त्रिसृभ्यो जसः अन्तः उदात्तः केन विहितः?

१२.७) सावेकाचस्तृतीयादिर्विभक्तिः (६.१.१८६)

सूत्रार्थः- सौ परे सति पूर्वस्मात् एकाचः शब्दात् परस्य तृतीयादिविभक्तेः स्वरः उदात्तः स्यात्।

सूत्रावतरणम्- सौ परे सति पूर्वस्मात् एकाचः शब्दात् परस्य तृतीयादिविभक्तेः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। अत्र चत्वारि पदानि सन्ति। सौ एकाचः तृतीयादिः विभक्तिः इति च सूत्रगतपदच्छेदः। यद्यपि सु इत्यस्य सप्तमीबहुवचने सुषु इति एव रूपं स्यात्, तथापि व्याख्यनात् सौ इति पदमत्र सप्तमीबहुवचनान्तं बोध्यम्। एकाचः इति पञ्चम्येकवचनान्तं पदम्, तृतीयादिः, विभक्तिः चेति पदद्वयम् अत्र प्रथमैकवचनान्तम्। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। सौ इत्यत्र सप्तमीविधानात् तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषया अत्र सौ इत्यस्य अव्यवहितपूर्वस्य इत्यर्थः लभ्यते। एकाचः इति पदस्य विशेष्यरूपेण शब्दस्य इति षष्ठ्येकवचनान्तं पदमत्र योज्यते। प्रकृतसूत्रेण विहितः उदात्तत्वधर्मश्च तृतीयादिविभक्तेः अचः भवति। तेन अत्रायं पदान्वयः भवति- सौ परे सति पूर्वस्मात् एकाचः शब्दात् परस्य तृतीयादिविभक्तेः स्वरः उदात्तः स्यात् इति।

उदाहरणम्- वा॒चा विरूपः।

सूत्रार्थसमन्वयः- वा॒चा विरूपः इति उदारहरणे विरूपः इति सुप्रत्ययान्तं पदम्। अतः तादृशसुपरकत्वात् पूर्वस्मात् एकाचः वाच्- शब्दात् परस्य टारूपस्य तृतीयाविभक्तेः स्वरस्य आकारस्य प्रकृतसूत्रेण उदात्तत्वं विधीयते।

१२.८) अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे (६.१.१६९)

सूत्रार्थः- नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीयादिविभक्तिरुदात्ता वा स्यात्।

सूत्रावतरणम्- अनित्यसमासे अन्तोदात्तात् उत्तरपदात् परस्य तृतीयादिविभक्तेः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- संज्ञा- परिभाषा- विधि- नियमातिदेशाधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। अन्तोदात्तात् उत्तरपदात् अन्यतरस्याम् अनित्यसमासे इति सूत्रगतपदच्छेदः। अन्तोदात्तात्, उत्तरपदात् चेति पदद्वयं पञ्चम्येकवचनान्तं पदद्वयम्, अन्यतरस्याम् इति सप्तमीबहुवचनान्तं पदम्, अनित्यसमासे इति च सप्तम्येकवचनान्तं पदम्। सावेकाचस्तृतीयादिर्विभक्तिः इति सूत्रात् अत्र एकाचः इति पञ्चम्येकवचनान्तं पदम्, तृतीयादिः विभक्तिः चेति प्रथमैकवचनान्तं पदद्वयमत्र अनुवर्तते। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः चेति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। एकाचः इति अनुवर्तमानं पदमत्र उत्तरपदात्

इत्यस्य विशेषणम्, अन्तोदात्तात् इत्यपि उत्तरपदात् इत्यस्य विशेषणम्। एवञ्च अत्र पदान्वयः इत्थं भवति- अनित्यसमासे अन्तोदात्तात् एकाचः उत्तरपदात् तृतीयादिः विभक्तिः उदात्तः अन्यतरस्याम् इति। अत्र विधीयमानः उदात्तत्वधर्मः तृतीयादिविभक्तेः स्वरस्य भवति। एकाचः इति अनुवर्तमानस्य पदस्य विशेष्यरूपेण शब्दस्य इति षष्ठ्येकवचनान्तं पदमत्र ग्राह्यम्। तेन अयं सूत्रार्थः अत्र लभ्यते- अनित्यसमासे अन्तोदात्तात् उत्तरपदात् एकाचः शब्दात् परस्य तृतीयादिविभक्तेः उदात्तः स्यात् इति। अत्र अन्यतरस्याम् इति कथनात् प्रकृतसूत्रविहितं कार्यं विकल्पेन भवति।

उदाहरणम्- परमवाचा।

सूत्रार्थसमन्वयः- परमा च असौ वाक् चेति इति विग्रहे कर्मधारयसमासे निष्पन्नस्य परमावाच् इति शब्दस्य समासत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां ततः स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु तृतीयैकवचनविवक्षायां टाप्रत्यये टाप्रत्ययाद्यस्य टकारस्य चुटू इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण तस्य इत्संज्ञकस्य टकारस्य लोपे सर्वसंयोगे परमवाचा इति रूपं सिध्यति। अत्र परमा इति पूर्वपदम्, वाक् इति च उत्तरपदम्। पूर्वपदं परमा इति च अन्तोदात्तम्। अतः तस्मात् परस्य वाच्- शब्दस्य एकाच्-त्वात् ततः परस्य तृतीयाविभक्तेः आकारस्य प्रकृतसूत्रेण उदात्तत्वं विधीयते।

१२.९) ऊडिदम्पदाद्यपुप्पुम्रैद्युभ्यः (६.१.१७६)

सूत्रार्थः- एभ्योऽसर्वनामस्थानविभक्तिरुदात्ता।

सूत्रावतरणम्- ऊडिदम्पदाद्यपुप्पुम्रैद्युभ्यः परस्य असर्वनामस्थानविभक्तेः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- संज्ञा- परिभाषा- विधि- नियमातिदेशाधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। अस्मिन् सूत्रे एकमेव समस्तं पदं वर्तते। तत्र समस्ते पदे समासः इत्थम्- पद् आदिः येषां ते पदादयः इति बहुव्रीहिसमासः ,ऊट् च इदं च पदादयश्च अप् च पुम् च रै च दिव् च इति विग्रहे इतरेतरद्वन्द्वसमासे ऊडिदम्पदाद्यपुप्पुम्रैदिवः इति रूपं, तेभ्यः इति ऊडिदम्पदाद्यपुप्पुम्रैद्युभ्यः। अञ्चेश्छन्दस्यसर्वनामस्थानम् इति सूत्रात् अत्र असर्वनामस्थानम् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। सावेकाचस्तृतीयादिर्विभक्तिः इति सूत्रात् अत्र विभक्तिः इति प्रथमैकवचनान्तं पदम् अनुवर्तते। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः चेति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। असर्वनामस्थानम् इति च संज्ञाबोधकं पदम्, सुडनपुंसकस्य इति सूत्रेण सु, औ, जस्, अम्, औट् चेत्यादीनां सर्वनामस्थानसंज्ञा भवति, तद्भिन्नाश्च प्रत्ययाः असर्वनामस्थानम् इत्युच्यन्ते। तच्च अनुवर्तमानं पदमत्र लिङ्गविपरिणामेन असर्वनामस्थाना इति रूपं लभते। ततश्च अत्र पदान्वयः इत्थं भवति- ऊडिदम्पदाद्यपुप्पुम्रैद्युभ्यः असर्वनामस्थाना विभक्तिः उदात्ता इति। एवञ्च अयमत्र सूत्रार्थः भवति- ऊडिदम्पदाद्यपुप्पुम्रैद्युभ्यः परस्य असर्वनामस्थानविभक्तेः उदात्तत्वं भवति इति।

उदाहरणम्- अक्षद्युवे, पद्भ्यां भूमिः इत्यादीनि अत्र उदारहणानि।

सूत्रार्थसमन्वयः- पद्भ्यां भूमिः इति उदाहरणे पद्-शब्दस्य अर्थवदधातुरप्रत्ययः प्रादिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञायां ततः स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ्सोसांङ्योस्सुप् इति सूत्रेण एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु तृतीयाद्विवचनविवक्षायां भ्याम्- प्रत्यये पद् भ्याम् इति स्थिते ततश्च सर्वसंयोगे पद्भ्याम् इति रूपं सिध्यति। अत्र पद इति शब्दस्य पदादिगणे पाठात् ततः परस्य च भ्याम् इत्यस्य सर्वनामस्थानसंज्ञाभावात् प्रकृतसूत्रेण तदन्तस्य पद्भ्याम् इति पदस्य अन्तस्य स्वरस्य आकारस्य उदात्तत्वं विधीयते।

एवम् अक्षद्युवे इत्यदौ अपि समानरूपेण प्रक्रियाकार्यं बोध्यम्।

१२.१०) अष्टनो दीर्घात् (६.१.१७२)

सूत्रार्थः- शसादिविभक्तिरुदात्ता।

सूत्रावतरणम्- दीर्घान्तात् अष्टन्-शब्दात् परेषां शसादीनाम् असर्वनामस्थानसंज्ञकानाम् उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। अत्र पदद्वयं वर्तते- अष्टनः इति, दीर्घात् इति। तत्र अष्टनः, दीर्घात् चेति पञ्चम्येकवचनान्तं पदद्वयम्। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। पूर्वसूत्रात् सावेकाचस्तृतीयादिर्विभक्तिः इत्यस्मात् अत्र विभक्तिः इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अञ्चेश्छन्दस्यसर्वनामस्थानम् इति सूत्रात् असर्वनामस्थानम् इति च प्रथमैकवचनान्तं संज्ञाबोधकं पदम् अनुवृत्तम्। तच्च लिङ्गविपरिणामेन असर्वनामस्थाना इति रूपं लभते। ततश्च अत्र पदान्वयः इत्थं भवति- दीर्घात् अष्टनः असर्वनामस्थानविशिष्टा विभक्तिः उदात्तः इति। अत्र दीर्घात् इति पदम् अष्टनः इत्यस्य विशेषणम् तदन्तविधिना अत्र दीर्घान्तात् अष्टनः इति अर्थः लभ्यते। ततश्च अयमत्र - दीर्घान्तात् अष्टन्-शब्दात् परं शसादयः असर्वनामस्थानाः विभक्तयः उदात्ताः स्युः इति।

उदाहरणम्- अष्टाभिर्दशभिः।

सूत्रार्थसमन्वयः- अष्टन्-शब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञायां ततः ङ्याप्प्रातिपदिकात्, प्रत्ययः परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ्सोसांङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु तृतीयाबहुवचनविवक्षायां भिसि अष्टन् भिस् इति स्थिते न लोपः प्रातिपदिकान्तस्य इति सूत्रेण अष्टन्-शब्दस्य नकारस्य लोपे अष्ट भिस् इति स्थिते सर्वसंयोगे निष्पन्नस्य अष्टभिस् इति शब्दस्वरूपस्य सुबन्तत्वात् तदन्तस्य सकारस्य स्थाने ससजुषोः रुः इति आदेशे रोः उकारस्य उपदेशेऽजनुनासिक इत् इति इत्संज्ञायां लोपे च कृते आत्त्वे अष्टाभिर् इति स्थिते रेफोच्चारणात् परस्य वर्णाभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायां तत्परकत्वात् पूर्वस्य रेफस्य स्थाने खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गे अष्टाभिः इति सुबन्तं रूपं सिद्ध्यति। प्रकृतसूत्रेण अष्टाभिः इत्यत्र भकारोत्तरस्य अचः इकारस्य उदातत्वं प्रकृतसूत्रेण विधीयते।

१२.११) शतुरनुमो नद्यजादी(६.१.१७३)

सूत्रार्थः- अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात्।

सूत्रावतरणम्- यस्य शतृप्रत्ययस्य नुमागमः न भवति तदन्तात् अन्तोदात्तात् परा या नदी अजादिश्च शसादिः विभक्तिः तस्य उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतं महर्षिणा पाणिनिना।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। शतुः अनुमः नद्यजादी इति सूत्रगतपदच्छेदः। शतुः इति अनुमः इति च पञ्चम्यन्तं पदम्। नद्यजादी इति प्रथमाद्विवचनान्तं पदम्। नदी च अजादिश्च इति कर्मधारयसमासः। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। पूर्वसूत्रात् सावेकाचस्तृतीयादिर्विभक्तिः इत्यस्मात् अत्र विभक्तिः इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अञ्चेश्छन्दस्यसर्वनामस्थानम् इति सूत्रात् असर्वनामस्थानम् इति च प्रथमैकवचनान्तं संज्ञाबोधकं पदम् अनुवृत्तम्। तच्च लिङ्गविपरिणामेन असर्वनामस्थाना इति रूपं लभते। ततश्च अत्र पदान्वयः इत्थं भवति- अनुमः शतुः अन्तोदात्तात् परा नदी अजादिः असर्वनामस्थाना विभक्तिः उदात्ता इति। ततश्च सूत्रार्थो भवति नुमागमरहितशतृप्रत्ययान्तात् अन्तोदात्तात् परेषां सर्वनामस्थानसंज्ञकभिन्नविभक्त्यवयवस्वराणां नदीसंज्ञकानां ङीप्-ङीष्-ङीन्-प्रत्ययानां ईकारस्य च उदात्तत्वं भवति इति।

उदाहरणम्- अच्छा रवं प्रथमा जानती।

सूत्रार्थसमन्वयः- जानती इत्यत्र जानत् इति शतृप्रत्ययान्तं रूपम्। ततश्च ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप्प्रत्यये जानत् ङीप् इति स्थिते ङीप्प्रत्ययादेः ङकारस्य लशक्वतद्धते इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण च तस्य लोपे जानत् ई इति स्थिते संयोगे निष्पन्नस्य जानती इति शब्दस्वरूपस्य ङीप्प्रत्ययान्तत्वात् ततः सौ विभक्तिकार्ये च जानती इति रूपम्। अत्र जानत् इति शतृप्रत्ययान्तं रूपम्, तत्र च शतृप्रत्ययस्य नुमागमो न भवति। अतः प्रकृतसूत्रेण अनुमः शतुः अन्तोदात्तात् परस्य नदीसंज्ञकस्य ङीप्प्रत्ययस्य ईकारस्य उदात्तत्वं विधीयते।

१२.१२) उदात्तयणो हल्पूर्वात्(६.१.१७४)

सूत्रार्थः- उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी शसादिर्विभक्तिश्च उदात्ता स्यात्।

सूत्रावतरणम्- उदात्तस्वरस्य स्थाने विहितः यः यणादेशः तस्मात् पूर्वं नदीसंज्ञकस्य शसादीनां विभक्तीनां च उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकाराख्येषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तत्वस्य विधानं क्रियते। अस्मिन् सूत्रे द्वे पदे स्तः। उदात्तयणः इति पञ्चम्यन्तं पदम्, हल्पूर्वात् इत्यपि पञ्चम्यन्तं पदम्। उदात्तस्थाने यण् उदात्तयण् इति मध्यपदलोपी कर्मधारयसमासः, तस्य उदात्तयणः। हल् पूर्वे अस्ति यस्य स हल्पूर्वः इति बहुव्रीहिसमासः, तस्मात् हल्पूर्वात्। शतुरनुमो नद्यजादी इति सूत्रात् नद्यजादी इति प्रथमान्तं पदम् अनुवर्तते। कर्षात्वतो घञोऽन्त

उदात्तः इति सूत्रात् उदात्तः चेति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते तच्च लिङ्गविपरिणामेन उदात्ता इति भवति। पूर्वस्मात् सावेकाचस्तृतीयादिर्विभक्तिः इति सूत्रात् अत्र विभक्तिः इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अञ्चेश्छन्दस्यसर्वनामस्थानम् इति सूत्रात् असर्वनामस्थानम् इति प्रथमैकवचनान्तं संज्ञाबोधकं पदम् अनुवृत्तम्। तच्च असर्वनामस्थानं विभक्तिः इति पदस्य विशेषणम् अतो लिङ्गविपरिणामेन असर्वनामस्थाना इति रूपं लभते। असर्वनामस्थानम् इति च संज्ञाबोधकं पदम्, सुडनपुंसकस्य इति सूत्रेण च सु, औ, जस्, अम्, औट् चेत्यादीनां सर्वनामस्थानसंज्ञा भवति, तद्भिन्नाश्च प्रत्ययाः असर्वनामस्थानम् इत्युच्यन्ते शसादयः विभक्तयः असर्वनामस्थान इत्यनेन उच्यन्ते। ततश्च अत्र पदान्वयः इत्थं भवति- हल्पूर्वात् उदात्तयणः नदी अजादिः असर्वनामस्थाना विभक्तिः उदात्ता इति। तेन च सूत्रस्यास्य अयमर्थो भवति हल्परकोदात्तस्थाने विहितः यः यण् ततः परेषां सर्वनामस्थानसंज्ञकविभक्त्यवयवस्वराणां नदीसंज्ञकानां ङीप्-ङीष्-ङीन्-प्रत्ययानां ईकारस्य च उदात्तत्वं भवति इति।

उदाहरणम्- चोदयित्री सूनृतानाम्।

सूत्रार्थसमन्वयः- चोदयित्री इत्यत्र चोदि- धातोः तृच्प्रत्यये चोदि तृ इति स्थिते तृच्प्रत्ययस्य च इडागमे चोदि इतृ इति स्थिते चोदि-धातोः इकारस्य गुणे एकारे चोदे इतृ इति स्थिते यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण एकारस्य स्थाने अय्-इत्यादेशे चोदयितृ इति स्थिते तस्य तृच्प्रत्ययान्तस्य चोदयितृशब्दस्वरूपस्य कृदन्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां ततश्च ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप्प्रत्यये चोदयितृ ङीप् इति स्थिते ङीप्प्रत्ययादेः ङकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण च तस्य लोपे चोदयितृ ई इति स्थिते ऋकारस्य स्थाने च रेफादेशे निष्पन्नस्य चोदयित्री इति शब्दस्वरूपस्य ङीप्प्रत्ययान्तत्वात् ततः ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप् इति सूत्रेण एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सुप्रत्यये अनुनासिकत्वेन पाणिनीयैः प्रतिज्ञातस्य उकारस्य उपदेशेऽजनुनासिकः इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण इत्संज्ञकस्य उकारस्य लोपे चोदयित्री स् इति स्थिते संयोगे चोदयित्री स् इति स्थिते हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इति सूत्रेण ङ्यन्तात् परस्य सुप्रत्ययस्य सकारस्य लोपे चोदयित्री इति रूपं सिध्यति। अत्र चोदयित्री इत्यत्र चोदयितृ इति अवस्थायाम् उदात्तस्य ऋकारस्य स्थाने यण् रेफः विधीयते, स च रेफः हल्पूर्वः। अतः तस्मात् परस्य नदीसंज्ञकस्य ङीप्प्रत्ययस्य ईकारस्य प्रकृतसूत्रेण उदात्तत्वं विधीयते।

१२.१३) ह्रस्वनुड्भ्यां मतुप् (६.१.१७६)

सूत्रार्थः- ह्रस्वान्तादन्तोदात्तान्नुटश्च परः मतुबुदात्तः।

सूत्रावतरणम्- ह्रस्वान्तात् अन्तोदात्तात् च परस्य मतुपः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। द्विपदात्मके अस्मिन् सूत्रे ह्रस्वनुड्भ्याम् इति पञ्चमीद्विवचनान्तं पदम्, मतुप् इति च प्रथमैकवचनान्तं पदम्। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे इति सूत्रात् अत्र अन्तोदात्तात् इति पञ्चम्येकवचनान्तं पदम् अत्र अनुवर्तते। ततश्च अत्र पदान्वयः भवति- ह्रस्वनुड्भ्याम् अन्तोदात्तात् मतुप् उदात्तः इति। अत्र अन्तोदात्तात् इति पदञ्च नुट् इत्यस्य विशेषणम्। तेन तदन्तविधिना च अन्तोदात्तान्तात् नुट्-प्रत्ययान्तात् इत्यर्थो भवति। ततश्च अयमत्र सूत्रार्थः भवति- ह्रस्वान्तात् अन्तोदात्तात् नुट्प्रत्ययान्तात् च परस्य मतुपः उदात्तत्वं भवति इति।

उदाहरणम्- अ॒क्ष॒ण्वन्त॒ः कर्ण॑वन्तः सखा॑यः।

सूत्रार्थसमन्वयः- अक्षण्वन्तः इत्यत्र अन्तोदात्तनुडन्तात् मतुप्-प्रत्ययः विहितः। अतः अन्तोदात्तनुडन्तात् परस्य मतुपः अकारस्य प्रकृतसूत्रेण उदात्तत्वं विधीयते।

१२.१४) ङ्याश्छन्दसि बहुलम्(६.१.१७८)

सूत्रार्थः- ङ्याः परो नामुदात्तो वा।

सूत्रावतरणम्- छन्दसि ङ्याः परस्य नामः विकल्पेन उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। ङ्याः छन्दसि बहुलम् इति सूत्रगतपदच्छेदः। त्रिपदात्मके अस्मिन् सूत्रे ङ्याः इति पञ्चम्येकवचनान्तं पदम्, छन्दसि इति सप्तम्येकवचनान्तं पदम्, बहुलम् इति च प्रथमैकवचनान्तं पदम्। नामन्यतरस्याम् इति सूत्रात् अत्र नाम् इति प्रथमैकवचनान्तं पदम्, कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः चेति प्रथमैकवचनान्तं पदम्, पूर्वसूत्रात् सावेकाचस्तृतीयादिर्विभक्तिः इत्यस्मात् अत्र विभक्तिः इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तन्ते। ततश्च अत्र अयं पदान्वयः भवति- ङ्याः छन्दसि बहुलं नाम् उदात्तः इति। अत्र नाम् इति च नुडागमसहितस्य आम्-विभक्तेः रूपम्। तच्च अत्र षष्ठ्येकवचनान्ततया विपरिणम्यते। ततश्च अयमत्र सूत्रार्थो भवति- छन्दसि ङ्याः परस्य नामः उदात्तत्वं भवति इति।

उदाहरणम्- दे॒व॒से॒नाना॑मभिभञ्ज॒ती॒नाम्।

सूत्रार्थसमन्वयः- अभिभञ्जतीनाम् इत्यत्र अभिभञ्जती इति ङीप्प्रत्ययान्तं पदम्। अतः अभिभञ्जती इति ङ्यन्तं पदम्। तस्मात् प्रकृतसूत्रेण ङ्यन्तात् अभिभञ्जती इत्यस्मात् षष्ठीबहुवचनविवक्षायां विहितस्य नुडागमसहितस्य आम्प्रत्ययस्य आकारस्य उदात्तत्वं विधीयते।

१२.१५) न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः(६.१.१८२)

सूत्रार्थः- एभ्यः प्रागुक्तं न।

सूत्रावतरणम्- छन्दसि गो, श्वन्- इत्यादिभ्यः परेषां हलादीनां विभक्तीनाम् उदात्तत्वनिषेधार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं निषेधसूत्रम्। अनेन उदात्तस्वरः निषिध्यते। अस्मिन् सूत्रे द्वे एव पदे स्तः- न इति, गोश्वन्सावर्वर्णराडङ्क्रुङ्कृद्भ्यः इति च। तत्र न इति अव्ययपदम्, गोश्वन्सावर्वर्णराडङ्क्रुङ्कृद्भ्यः इति च समस्तं पञ्चमीबहुवचनान्तं पदम्। गौश्च श्वा च सावर्वर्णश्च राट् च अङ् च क्रुङ् च कृत् च इति विग्रहे इतरेतरद्वन्द्वसमासे गोश्वन्सावर्वर्णराडङ्क्रुङ्कृदः, तेभ्यः इति गोश्वन्सावर्वर्णराडङ्क्रुङ्कृद्भ्यः। अत्र सावर्वर्णः इत्यस्य सौ अवर्णः इत्यर्थः। षट्त्रिचतुर्भ्यो हलादिः इति सूत्रात् अत्र हलादिः इति प्रथमैकवचनान्तं पदम्, कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदम्, सावेकाचस्तृतीयादिर्विभक्तिः इत्यस्मात् अत्र विभक्तिः इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तन्ते। ततश्च अयमत्र पदान्वयः भवति- गोश्वन्सावर्वर्णराडङ्क्रुङ्कृद्भ्यः हलादिः विभक्तिः न उदात्तः इति। तेन अयं सूत्रार्थः लभ्यते- गोश्वन्सावर्वर्णराडङ्क्रुङ्कृद्भ्यः परेषां हलादीनां विभक्तीनाम् उदात्तत्वं न स्यात् इति।

उदाहरणम्- गोभ्यों गातुम्।

सूत्रार्थसमन्वयः- गोभ्यः इत्यत्र गोशब्दात् भ्यस् इति हलादिः विभक्तिः वर्तते। अतः प्रकृतसूत्रेण गोशब्दात् परस्य भिस् इति हलादिविभक्तेः उदात्तत्वं निषिध्यते।

१२.१६) दिवो झल् (६.१.१८३)

सूत्रार्थः- दिवः परा झलादिविभक्तिः न उदात्ता।

सूत्रावतरणम्- दिव्-शब्दात् परेषां झलादिविभक्तीनाम् उदात्तत्वनिषेधार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं निषेधसूत्रम्। अनेन उदात्तस्वरः निषिध्यते। अस्मिन् सूत्रे द्वे एव पदे स्तः- दिवः इति, झल् इति। तत्र दिवः इति पञ्चम्येकवचनान्तं पदम्, झल् इति प्रथमैकवचनान्तं पदम्। न गोश्वन्सावर्वर्णराडङ्क्रुङ्कृद्भ्यः इति सूत्रात् अत्र न इति अव्ययम्, कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदम्, सावेकाचस्तृतीयादिर्विभक्तिः इत्यस्मात् अत्र विभक्तिः इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तन्ते। ततश्च अयमत्र पदान्वयः- दिवः झल् विभक्तिः न उदात्तः इति। अत्र झल् इति विभक्तेः विशेषणम्। अतः यस्मिन् विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधिना झलादिः विभक्तिः इत्यर्थः लभ्यते। एवञ्च सूत्रार्थः भवति- दिव्-शब्दात् परेषां झलादिविभक्तीनाम् उदात्तत्वं न स्यात् इति।

उदाहरणम्- द्युभिर्क्तुभिः।

सूत्रर्थसमन्वयः- दिव्-शब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञायां प्रत्ययः परश्च ङ्याप्प्रातिपदिकात् इति सूत्रत्रयम् अधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु तृतीयैकवचनविवक्षायां भिस्प्रत्यये दिव् भिस् इति स्थिते दिव्-शब्दस्य स्थाने अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन दिव उत् इति सूत्रेण उत् इति अन्तादेशेऽनुबन्धलोपे दि उ भिस् इति स्थिते इकारस्य स्थाने इको यणचि इति सूत्रेण यणादेशे यकारे द् य् उ भिस् इति स्थिते

भिसः सकारस्य ससजुषो रः इति सूत्रेण रुत्वे विसर्गे द्युभिः इति रूपं सिद्ध्यति। द्युभिः इत्यत्र दिव्-शब्दात् भिस् इति प्रत्ययः वर्तते। स च भिस्प्रत्ययः झलादिः वर्तते। अतः प्रकृतसूत्रेण दिव्-शब्दस्य परस्य झलादेः भिसः प्रत्ययस्य उदात्तत्वं निषिध्यते।

१२.१७) तित्स्वरितम् (६.१.१८५)

सूत्रार्थः- तित्प्रत्ययस्य स्वरितत्वम्।

सूत्रावतरणम्- तितः प्रत्ययस्य स्वरस्य स्वरितत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन स्वरितस्वरः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। तित् इति, स्वरितम् इति। अत्र उभयमेव पदम् प्रथमैकवचनान्तं बोध्यम्। तित् इति पदस्य विशेष्यरूपेण प्रत्ययः इति पदमत्र योज्यम्। एवञ्च अत्र पदान्वयः भवति- तित् (प्रत्ययः) स्वरितम्। ततश्च सूत्रार्थः भवति- तित्प्रत्ययः स्वरितः स्यात् इति।

उदाहरणम्- क्व॑ नू॒नम्।

सूत्रार्थसमन्वयः- किम्-शब्दात् किमोऽत् इति सूत्रेण अत्प्रत्यये हलन्त्यम् इति सूत्रेण तकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण च तस्य इत्संज्ञकस्य तकारस्य लोपे किम् अ इति स्थिते क्वाति इति सूत्रेण किम् इति शब्दस्य स्थाने क्व इत्यादेशे क्व अत् इति स्थिते अतो गुणे इति सूत्रेण क्व इत्यस्य अकारस्य अत् इत्यस्य अकारस्य च स्थाने पररूपे एकादेशे अकारे सर्वसंयोगे क्व इति रूपं सिध्यति। क्व इति तित्प्रत्ययान्तं विद्यते। अतः क्व इत्यत्र प्रकृतसूत्रेण अकारस्य स्वरितस्वरः भवति।

१२.१८) उपोत्तमंरिति (६.१.१९७)

सूत्रार्थः- रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात्।

सूत्रावतरणम्- रित्प्रत्ययान्तस्य उपोत्तमस्य उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः- उपोत्तमम् इति, रिति इति च। तत्र उपोत्तमम् इति अव्ययम्, रिति इति च सप्तम्येकवचनान्तं पदम्। कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। उपोत्तमं नाम द्विसंख्याधिकस्वरविशिष्टस्य पदस्य अन्तात् पूर्वस्वरः। ततश्च अत्र पदान्वयः भवति- रिति उपोत्तमं उदात्तम् इति। रिति इति पदस्य विशेष्यरूपेण प्रत्ययः इति पदस्य आक्षेपः कर्तव्यः। एवञ्च अत्र सूत्रार्थो भवति- रित्प्रत्ययान्तस्य उपोत्तमस्य उदात्तत्वं स्यात् इति।

उदाहरणम्- यदाहवनीये।

सूत्रार्थसमन्वयः- आहवनीये इत्यत्र आपूर्वकात् हुधातोः कृत्यल्युटो बहुलम् इति सूत्रेण बाहुलके अधिकरणार्थे अनीयर्- प्रत्यये अनीयर्-प्रत्ययान्तस्य रेफस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः

इति सूत्रेण इत्संज्ञकस्य रकारस्य लोपे आ हु अनीय इति जाते धातोः उकारस्य गुणे ओकारे आ हो अनीय इति जाते यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण ओकारस्य स्थाने अव् इत्यादेशे आहव् अनीय इति जाते संयोगे निष्पन्नस्य आहवनीय इति शब्दस्वरूपस्य कृदन्तत्वात् ततः ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप् इति सूत्रेण एकविंशतिषु स्वादिप्रत्ययेषु प्राप्तेषु सप्तम्येकवचनविवक्षायां ङिप्रत्यये ङिप्रत्ययादेः ङकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण च इत्संज्ञकस्य ङकारस्य लोपे आहवनीय इ इति स्थिते एकः पूर्वपरयोः इत्यधिकारे पठितेन आद्गुणः इति सूत्रेण तयोः अकारस्य इकारस्य च स्थाने गुणे स्थानत आन्तर्यात् एकारे सर्वसंयोगे आहवनीये इति रूपं सिध्यति। प्रकृते उदाहरणे आहवनीये इति अनीयर्-प्रत्ययान्तं पदम्, स च अनीयर्-प्रत्ययः रिद् भवति। अतः प्रकृतसूत्रेण तदन्तस्य आहवनीये इति पदस्य अन्त्यात् पूर्वस्य एकारस्य उदात्तत्वं विधीयते।

पाठगतप्रश्नाः-२

१०. सावेकाचस्तृतीयादिर्विभक्तिः इति सूत्रेण किं विधीयते?

११. अन्तोदात्तादुत्तरपदादन्यतरस्यमनित्यसमासे इति सूत्रेण किं विधीयते?

१२. ऊडिदम्पदाद्यपुप्पुम्रैद्युभ्यः इति सूत्रेण किं विधीयते?

१३. शसादिविभक्तिरुदात्ता इति कस्य सूत्रस्य अर्थः?

१४. अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात् इति कस्य सूत्रस्य अर्थः?

१५. चोदयित्री इत्यत्र ईकारस्य उदात्तत्वं केन विहितम्?

पाठसारः

अत्र अष्टाध्याय्याः तृतीयाध्यायस्य षष्ठाध्यायस्य च सूत्राणि आलोचितानि। अत्र तु वैदिकव्याकरणं चर्च्यते। पाणिनिः लौकिकव्याकरणस्य कृते स्वरादिव्यवस्थां कृतवान्। परन्तु कालक्रमेण स्वरव्यवस्था प्रायः लुप्ता दृश्यते। परन्तु सम्प्रति अपि वेदे तु स्वरस्य माहात्म्यं भूयशः परिलक्ष्यते। पूर्वतने पाठद्वये धातुस्वरः प्रातिपदिकस्वरः फिट्-स्वरश्च आलोचिताः सन्ति। प्रकृतपाठे अस्मिन् प्रत्ययस्वराणां तु चर्चा क्रियते। सामान्यतः सवेषां प्रत्ययानां आदिः स्वरः उदात्तो भवति। आद्युदात्तश्च

इत्यादिना सूत्रेण प्रत्ययस्य आदिः स्वरः उदात्तः भवति। परन्तु सामान्यतः सुप्प्रत्ययाः अनुदात्ताः भवन्ति। अनुदात्तौ सुप्पितौ इति निर्देशात्। काश्चित् विशेषप्रत्ययान् समाश्रित्य त्रिसृभ्यो जसः इत्यादिविशेषसूत्रं रचितं सूत्रकर्त्रा। उदात्तादिस्वराणां निषेधार्थम् अपि कानिचित् सूत्राणि प्रोक्तानि पाणिनिना। यथा- दिवो झल् इत्यादीनि सूत्राणि। दिव्-शब्दात् परेषां झलादिविभक्तीनाम् उदात्तत्वनिषेधार्थं सूत्रमिदं प्रणीतम्। एवञ्च अस्य पाठस्य मुख्यः विषयः भवति प्रत्ययस्वरः इति।

पाठान्तप्रश्नाः

१. आद्युदात्तश्च इति सूत्रं व्याख्यात।
२. तद्धितस्य इति सूत्रं व्याख्यात।
३. परमवा॒चा इति रूपं साधयत।
४. चो॒द॒यि॒त्री इति रूपं ससूत्रं साधयत।
५. यज्ञस्य इति रूपं साधयत।
६. आहवनीये इति रूपं साधयत।
७. शतुरनुमो नद्यजादी इति सूत्रं व्याख्यात।
८. ङ्याश्छन्दसि बहुलम् इति सूत्रं व्याख्यात
९. न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः इति सूत्रं व्याख्यात।
१०. कौञ्जायनाः इति रूपं ससूत्रं साधयत।

पाठगतप्रश्नानामुत्तराणि

पाठगतप्रश्नाः-१

१. अग्निशब्दात् निप्रत्ययस्य विधानम् अङ्गेर्नलोपश्च इति सूत्रेण भवति
२. आद्युदात्तश्च इति सूत्रेण प्रत्ययस्य आद्युदात्तत्वं विधीयते
३. अग्निशब्दे नकारात् परः इकारः उदात्तः
४. अगिधातुः
५. अनुदात्तौ सुप्पितौ इति सूत्रेण
६. चितः इति सूत्रेण
७. तद्धितस्य इति अधिकारसूत्रम्।
८. कितः इति सूत्रेण

९. तिसृभ्यो जसः इति सूत्रेण

उत्तराणि-२

१०. उदात्तस्वरः

११. उदात्तस्वरः

१२. उदात्तस्वरः

१३. अष्टनो दीर्घात् इति सूत्रस्य

१४. शतुरनुमो नद्यजादी इति सूत्रेण

१५. उदात्तयणो हल्पूर्वात् इति सूत्रेण।

इति प्रत्ययस्वराः

।।इति द्वादशः पाठः।।